नं० १०२६-घ

आत्मबोधप्रकरणम् सटीकम् (वेदान्तशास्त्रम्)

पत्राणि १८ (सम्पूर्णम्)

१८पत्रे

नं० १०२६-घ

कर्ता श्री शंकराचार्य:

लिपिक: जवाहिर गिरि:

नं० १०२५ म
(आत्मबोध टीका
१८ पत्राणि
वेदान्तशास्त्र - सम्पूर्ण

आ०टी० श्रीगणेशायनमः ॐ ज्ञानमुख्यपूजितपादं ज्ञातपद्यमनसोप्यगो
१ चराकारं विकसितजलरुहनेत्रं सीताछायांकमाश्रयेरामम् १
इहभगवान्शंकराचार्यः उत्तमाधिकारिणां वेदांतप्रस्थानत्रयंनि
र्मायतद्वलोकनेऽसमर्थानांमंदबुद्धीनांअनुग्रहार्थंसर्ववेदांत
सिद्धांतसंग्रहंआत्मबोधाख्यंप्रकरणंनिर्दिदिक्षुःप्रतिजा
नीते तपोभिरिति तपोभिःक्षीणपापानांशांतानांवीतरागिणां
मुमुक्षूणांमपेक्ष्योयमात्मबोधोभिधीयते १ कृच्छ्रचांद्रायणनि
त्यनैमित्तिकउपासनाद्यनुष्ठानरूपैस्तपोभिःक्षीणानिपापानि
रागाद्यंतस्करणदोषायेषांते नित्यनैमित्तकैरेवकुर्वाणोदुरित
क्षयमाप्नोतीतिवचनात् अतएवशांतानामक्षोभितांतःकरणानांवीत
रागिणांइहामुत्रार्थफलभोगरहितानांमुमुक्षूणांसंसारबंधविच्छेद
न नैकयत्नानांयथोक्तसाधनसंपन्नानांअयमात्मबोधोऽभिधीय राम
ते विधिमुखेनावश्यकतयाप्रतिपाद्यतइत्यर्थः नतुतपोमंत्रकर्म १

योगाद्यनेकसाधनेषु सत्सु मोक्षं प्रति बोध एव किमिति प्राधान्येनो
च्यत इत्यत आह बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनं पा
कस्य वह्निवद्यतः ज्ञानं विना मोक्षो न सिध्यति २ बोध इति तपोम
न्त्रकर्मयोगादिसाधनानि परंपरया क्रमेण ज्ञानद्वारा मोक्षं साध
यति ज्ञानं तु स्वजन्ममात्रादेवाज्ञानं निःशेषं नाशयित्वा मुमुक्षुं स्व
राज्येऽभिषेचयति अतोऽन्यसाधनेभ्यो ज्ञानस्य प्राधान्यमुक्तं तदे
व दृष्टान्तेन द्रढयति पाकस्येति यथा लोके पचनक्रियायां काष्ठजल
भांडादिसाधनेषु सत्स्वपि वह्निं विना पाको न सिध्यति तद्वज्ज्ञानं
विना मोक्षो न सिध्यतीत्यर्थः ननु कर्मणां विचित्रशक्तिमत्त्वाच्च
कर्मैव किंचिदज्ञानं नाशयिष्यति किमात्मज्ञानेनेत्याशंक्य कर्मा
ज्ञानयोर्विरोधाभावान्नैवमित्याह अविरोधीति कर्मैकेन
अविरोधितया कर्म नाविद्यां विनिवर्तयेत् विद्याविद्यां निहंत्येव
तेजस्तिमिरसंघवत् ३ कर्मणोऽविद्यासहाविरोधाभावादज्ञानं ना

आ॰टी॰ नाशयितुं नोत्सहते विद्यापायिकाशरूपत्वादंधतमसस्तेजःपुंज इव नाश
२ यितुं समर्थ इत्यर्थः ननु प्रतिशरीरमात्मा परिच्छिन्न एवोपलभ्य
२ ते कथमस्य कैवल्यमित्यत्राह परिच्छिन्न इति परिच्छिन्न इवा
ज्ञानात्तन्नाशे सति केवलः स्वयंप्रकाशते ह्यात्मा मेघापायेंऽशु
मानिव ४ परिपूर्णस्याद्वितीयस्यात्मनः अज्ञानपरिकल्पि
तो ध्यानच शरीराध्यासकृतः परिच्छिन्नत्वमविवेककृतमेव न।
तु तत्त्वदृष्ट्या अतो विवेकज्ञानेनाविवेकहानादात्मा केवल एव प्र
काशते मेघावरणाभावे भानुवदित्यर्थः नन्वात्मनोद्वैतसिद्धि
रमुक्ताव्यक्तिज्ञानेनद्वैतसिद्धेरित्यत्राह अज्ञानेति अज्ञानकलु
षं जीवं ज्ञानाभ्यासाद्विनिर्मलं कृत्वा ज्ञानं स्वयं नश्येज्जलं कत
करेणुवत् ५ अज्ञानकार्यभूतैरहमादिभिः कलुषीकृतं कर्तृ
मो त्वं कर्त्राद्यभिमानिनं जीवं निर्मलं कृत्वा चिरकालाभ्यासवशात् राम
अज्ञानहननद्वारा तत्कार्यांतःकरणादिकं निःशेषं नाशयित्वा २

स्वयमेवविनश्यति अज्ञानकार्यत्वात् वृत्तेः तत्रप्रतिबिंबितं ज्ञा
नमात्माभासत्वात् आत्मन्येवैकं भवति तदानीमद्वय एवात्मा
प्रकाशते यथाकतकरेणुः राविलंजलं निर्मलंकृत्वास्वयमेव
नश्यतितद्वदित्यर्थः ननु अपरोक्षतयानुभूयमानस्य संसार
स्य कथमत्यंतमसत्वं प्रत्यक्षाविरुद्धमित्याशंक्य स्वप्नदृष्टांतेना
स्य मिथ्यात्वं साधयति संसारइति संसारः स्वप्नतुल्योहि रा
गद्वेषादिसंकुलः स्वकाले सत्यवद्भाति प्रबोधे सत्य वद्भवेत्
६ रागद्वेषादिभिः संकुलायमानः संसारः स्वकाले स्वस्यका
रणभूताज्ञाने स्थितिसति तावत्तोन्यथाभूतोप्ययं संसारः सन्नि
याभाति प्रबोधे सति वाक्यश्रवणाद्दात्मज्ञानोत्पत्तौ असन्निव
भवति तत्र दृष्टांतः स्वप्नतुल्यं इति स्वप्नोहि यावन्निद्रा उ नानु
भूयते तावन्मिथ्याभूतोपि सत्यइवाभाति प्रबोधे निद्रानाशे स
ति मिथ्या तद्वदित्यर्थः ६ जगन्मिथ्यात्वमेवतत्र दृष्टांतान्तरेण द्र

आ॰टी॰ दृश्यति तावदिति तावत्सत्यं जगद्भ्रान्तिशुक्तिकारजितं यथा या
३ वन्न ज्ञायते ब्रह्मणे सर्वाधिष्ठानमद्वयम् ७ यथा नीलपृष्ठत्रि
३ कोणादिविशेषज्ञानं यावन्नोत्पद्यते तावद्रजितज्ञानसत्यमे
वानुभूयते तथा सर्वाधिष्ठानभूतं सच्चिदानंदाद्वयब्रह्म यावु
न्न ज्ञायते साक्षान्नानुभूयते तावज्जगदाकारेण परिणतः सं
सारः सत्यवद्भ्रांत्या दृश्यते इत्यर्थः ७ सर्वं दृश्यं प्रपंचजा
तं ब्रह्मण्येव मायाकल्पितमिति प्रतिपादयति सच्चिदात्म
न्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः व्यक्तयो विविधाः सर्वाः
हाटके कटकादिवत् ८ सत्यज्ञानानंदात्मनि नित्ये सर्वानु
स्यूते विष्णौ व्यापके ब्रह्मणि सर्वाः देवदानवाः ऋषयो नराः
स्थावरजंगमादयो विविधा अपि व्यक्तयः सर्वोपादानभूते प
रे ब्रह्मणि ईश्वरे हेम्नि कटकमुद्रिकादयः इव कल्पिता एव ब्र
ह्मणि अभिन्ना इत्यर्थः उक्तमर्थमाकाशदृष्टांतेन द्रढयति॥ राम ३

यथेति यथाऽकाशोहृषीकेशोनानोपाधिगतोविभुः तद्वदेवाद्वितीयव शातितन्नाशोरैकवद्भवेत ९ हृषीकेशः मनःप्रभृतिसर्वेन्द्रिय प्रवर्तकः नियामकोयोविभुः सर्वगतः परमेश्वरः स्वमायया प रिकल्पितनानाविधोपाधिषुप्रतिबिंबतः सन्नानेवभातितन्ना शेसतिब्रह्मात्मैक्यज्ञानेनतेषांमाययाकल्पितदेहाद्युपाधीनां नाशेसतिकेवलंएकवद्भवति यथाएकएवाकाशोघटमठा द्युपाधिषुएवनानाविधोभवति उपाधिलयादेकवद्भवतीत्यर्थः ९ नन्कुसर्वदेहेषुतत्तज्जात्यादिभिरनुवर्तस्यकथंनित्य मुक्तत्वमुच्यतेतत्राह नानोपाधीति नानोपाधिवशादेवजा तिवर्णाश्रमादयः आत्मन्यारोपितास्तोयेरसवर्णादिभेदव त् १० पूर्वोक्तनानोपाधिवशादेवात्मनिजातिवर्णाश्रमा दयोआरोपितामायाकल्पितानतुस्वतः यथास्वभावतोमाधु र्येजलंकटुतीक्ष्णलवणाम्लरक्तपीतादिद्रव्योपेतंसत्तद्रूपंभ

आ॰टी॰ वतिनतुस्वरूपेणतद्वदित्यर्थः १० आत्मनोविद्यापरिकल्पितोपा
७ धित्रयमध्येस्थूलोपाधिमाह पंचीति पंचीकृतमहाभूतसंभ
५ वंकर्मसंचितं शरीरंसुखदुःखानांभोगायतनंमुच्यते ११
पंचानांभूतानांप्रत्येकंद्विधाविभज्यतत्रैकैकमर्द्धंचतुर्द्धाविभज्य
स्वांशंपरित्यज्यतेषुयोजनंपंचीकरणंएवंपंचीकृतेभ्यःस्थूल
पृथिव्यादिमहाभूतेभ्यःसंभवोयस्यप्रारब्धकर्मभिःसंचितंर
चितंस्थूलशरीरंसुखदुःखानामायतनंभोगस्थानंप्रत्यगात्म
नइति ११ सूक्ष्मोपाधिमाह पंचप्राणमनोबुद्धिदशेंद्रियसम
न्वितं अपंचीकृतभूतोत्थंसूक्ष्मांगंभोगसाधनं १२ पंचप्रा
णाःएकस्यैवमहाप्राणस्यपंचवृत्तयःज्ञानेंद्रियकर्मेंद्रियभेदे
नदशेंद्रियाणिदशमनःशब्देनसंकल्पविकल्पवंतःकरणवृ
त्तिःबुद्धिःनिश्चयात्मिकाएतैःसंयुक्तंअपंचीकृतसूक्ष्मभूतोत्थं राम
तज्जातंसूक्ष्मांगंलिंगशरीरंसुखदुःखभोगसाधनमित्यर्थः १२ ७

तृतीयंकारणोपाधिविद्याुपाधिमाह अनादीति अनाद्यविद्यानिर्वा
च्योकारणोपाधिरुच्यते उपाधित्रितयादन्यमात्मानमवधारये
त् १२ सदसद्भ्यामनिर्वाच्या अविद्या अनादिभूता कारणोपाधिरु
च्ये सा च समष्टिव्यष्टिभेदेन स्थूलसूक्ष्मप्रपंचयोः कारणभूतत्वा
त्कारणोपाधिरुच्यते उपाधित्रयकथने प्रयोजनमाह उपाधित्रि
तयादन्यमितितत्साक्षिणमात्मानमवधारयेत् जानीयादित्यर्थः
१३ ननु अन्नमयादिकोशानुव्याप्यतत्तन्मयतयास्थितस्य कुतो
नित्यत्वमुच्यते इत्याशंक्याह पंचकोशेति पंचकोशादियोगेन
तत्तन्मयइवस्थितः शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको य
था १४ अन्नमयप्राणमयमनोमयविज्ञानमयआनंदमयाः
पंचकोशाः आदिशब्देन अशनपिपासादिग्रहणं एतैर्योगेन मिथ्या
तादात्म्येन तत्तन्मयइवस्थितः आत्माशुद्धः ननु तेषु यस्तोरंजित
विद्यापि स वा एष पुरुषोन्नरसमय इत्यादिभिः सूक्ष्मवस्तुदर्शिना

आ॰टी॰ थंमेवोपाधिस्थंब्रह्मस्वचयतिनतुतत्वदृष्ट्यानिर्मलस्फटि।
५ कोनीलपीतवस्त्रादियोगेनतत्तन्मयइवाभातिवस्तुतोनास्ति
5 तेनरंजनात्तद्वदित्यर्थः १४ असंगात्मास्वरूपज्ञानविवेचन
प्रकारमाह वपुरिति वपुस्तुषादिभिःकोशैर्युक्तंयुक्त्याव।
घाततः आत्मानमंतरंशुद्धंविविच्यात्तंडुलंयथा १५ पंच
कोशेस्तावदात्मनिस्थितंवपुःस्थूलशरीरंतुषादिभिर्युक्तंतं
डुलमिवयुक्तंयुक्त्याचघाततःअवहननात् शुद्धमात्मानंतंडु
लमिवविविच्यात् विवेकेनजानीयात्कथंस्थूलदेहोपिना
त्माभूतकार्यत्वात्घटवत्सूक्ष्मदेहोपिनात्मादेहत्वात् स्थूल
देहवदित्यनुमानादिनातेभ्यःकोशेभ्योभिन्नमात्मानंविविच्या
जानीयादित्यर्थः १५ नन्वात्मासर्वगतस्तर्हिकिंसर्वत्रसर्वैर्नदृ
श्यतइत्यत्राह सदेति सदासर्वगतोप्यात्मानसर्वत्रावभासते। राम
बुद्धावेवावभासेतस्वच्छेषुप्रतिबिंबवत् १६ आत्मासर्वगतो ५

पि सर्वत्र व्याप्य स्थितोपि जडैर्देहादिभिर्व्यक्तात्वेन प्रकाश्यते रागादि
भिरविद्यायां बुद्धावेवावभासते न सर्वत्र यथा भ्राति विवः स्वच्छेषु
एव दर्पणादिषु दृश्यते नान्यत्र तद्वदित्यर्थः १६ देहे स्थितस्याप्यात्म
मन औदासीन्यं राजदृष्टांतेनाह देहेति देहेंद्रियमनोबुद्धिप्रकृ
तिभ्यो विलक्षणं तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा १७
देहेंद्रियमनोबुद्धिप्रकृतिभ्यो जडपरिणामिदृश्येभ्यो विलक्षणं
शुद्धात्मानं तद्वृत्तिनां साक्षितया स्थितं यथा राजा स्वनगरेषु स्थि
तेषु मंत्रिषु वर्त्तमानेषु स्वयं साक्षितया तन्नश्यन् तिष्ठति तद्वदेव
जानीयादित्यर्थः १७ ननु आत्मनो विकारित्वमयुक्तं सर्वदा
व्यापारवान् दृश्यते तत्राह व्यापृतेष्विति व्यापृतेष्विंद्रियेष्वा
त्मा व्यापारी वाविवेकिनां दृश्यते मेघेषु धावत्सु धावन्निव यथा
शशी १८ इंद्रियादिषु स्वे स्वे विषयेषु प्रवृत्तेषु स्वतः आत्मा
व्यापारी वा विवेकिनां गुरुशास्त्राद्युपदेशरहितानां दृश्यते न तु

आ॰टी॰ तत्वदृश्रो यथा मेघखंडै रुपुथा सुयत्रातु धावतु चंद्रो पिधायतीव
६ लौकिके दृश्यते न तु चंद्रमा धावति न तथात्मा पीत्यर्थः १८ ननु दे
६ हेंद्रियमनोबुद्धयो पि सचेतना दृश्यंते किमात्मानमाश्रित्य वर्त्तंते
तत्राह आत्मचैतन्येति आत्मचैतन्यमाश्रित्य देहेंद्रियमनोधि
यः स्वकीयार्थेषु वर्त्तंते सूर्यालोकं यथा जनोः १९ नित्यज्ञानस
रूपमात्मचैतन्यमाश्रित्य देहेंद्रियमनो बुध्यादयः स्वकीयार्थेषु
वर्त्तंते यथा जनाः प्राणिनः सूर्यप्रकाशमाश्रित्य स्वव्यापारेषु व्य
वहरंति अतश्चैतन्यज्ञानमात्मन एव देहेंद्रियादयस्तु सर्वे जडा इ
त्यर्थः १९ ननु अहं जानोस्मि बाल्य कौमाराद्यवस्थामनुभवामि
पश्यामीत्याद्यनवरतमनुभयमानस्यात्मनः कथमविकारित्व
मुच्यत इत्यत्राह देहेति देहेंद्रियगुणान्कर्माण्यमले सच्चिदात्म
नि अध्यस्यंत्यविवेकेन गगने नीलतादिवत् २० देहेंद्रियम राम
नोबुद्धिधर्मान्गुणांश्च सत्वादीन् कर्माणि कर्मेन्द्रियव्यापारान् ६

मिथ्यातादात्म्येनास्थिते निर्मले असंगरूपे सच्चिदात्मिके परमात्मन्ये
तत्सामीप्यादविवेकिनोध्यस्यंति यथा गगने नीलतादिवत् अतस्ते
आत्मधर्मा न भवंति अपि तु देहादीनामेवेत्यर्थः २० ननु कर्त्तृत्वभो
क्तृत्वादिकं आत्मनि अनवरतमनुभूयमानत्वात् दुर्वारमित्याशंक्य
तदपि तथैव मिथ्येत्याह अज्ञानेति अज्ञानान्मानसोपाधेः क
र्तृत्वादीनि चात्मनि कल्प्यंते अंबुगते चंद्रे चलनादि यथांभसः २१
अज्ञानवशान्मानसोपाधिस्तस्यैव कर्त्तृत्वादयो धर्मास्ते चा
ज्ञानवशादात्मनि कल्प्यंते यथांभसम्चलनादिकं अंबुनि प्रतिबिं
बति चंद्रमसि अविवेकिनः कल्प्यंते तद्वदात्मनीत्यर्थः २१ रागेच्छा
सुखदुःखादीनात्मधर्मान् मन्यंते वैशेषिकादयस्तान्निराकरोति
रागेच्छेति रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्त्तते सुषुप्तौ ना
स्ति तन्नाशे तस्मात् बुद्धेस्तु नात्मनः २२ रागेच्छासुखदुःखमय
त्वादिकं सर्वं बुद्धेरेव न त्वात्मनः कथं जाग्रत्स्वप्नयो बुद्धौ सत्यां प्रव

आ॰टी॰ नैते सुषुप्तौ तस्याबुधेर्नोद्रोकारणेलीनेनच प्रवर्त्तेते तस्मा नबुद्धे
७ रेवधर्मौ न त्वात्मन इति २२ ननु तर्हि आत्मा कीदृशस्वभाव इत्या
7 शंक्य आत्मस्वभावमुपदिशति प्रकाश इति प्रकाशोर्कस्य तोय
स्य शैत्यमग्नेर्यथोष्णता स्वाभावः सच्चिदानंदनित्यनिर्मलमा
त्मनः २३ यथा प्रकाशो द्रवार्कस्य स्वभावः तोयस्य शैत्यं अग्नेरु
ष्णता तथात्मनोपि सच्चिदानंदनित्यनिर्मलस्वभावः स्वरूपमित्य
र्थः २३ ननु एवं विकार्यमात्मा तर्हि जानामीति प्रत्ययः कथ
मित्यपेक्षायामाह आत्मेति आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति
द्वयं संयोज्य चाविवेकेन जानामीति प्रवर्त्तते २४ प्रत्यगात्मनः
सच्चिदंशश्च अंशद्वयांशः आत्माभासः बुद्धेर्वृत्तिश्च एतत् द्वयं अ
विवेकेन संयोज्यासंगस्यात्मनः केनापि संयोगो नास्त्येव तथाप्य
ज्ञानवशात् मेलनं संभाव्य जानामीति प्रत्ययः अहंकारवृत्तिप्रवृत्ते राम
तेन केवलप्रत्यगात्मनि किंचिद्विकारो नास्तीति भावः २४ एतदेव ७

दर्शयति आत्मनइति आत्मनोविक्रियानास्तिबुध्यैबोधोनजातिं
ति जीवः सर्वमलंज्ञात्वाकर्त्ताद्रष्टेतिमुह्यति २५ आत्मास्वभावा
देवविकारशून्यः बुध्येः कदाचिदपिबोधज्ञंकेवनास्तितथापि
जीवः साभासाहंकारः सर्वसाभासांतःकरणवृत्तीनामेकत्रतसा
यसपिंडवदेकत्रसंगतमेवममलमत्यर्थंज्ञात्वादेहेंद्रियादिकमह
मितिविचार्याहंकर्त्ताहंद्रष्टेतिमुह्यतिभ्रांतोभवतीत्यर्थः २५
आत्मास्वयमेवस्वस्मिन्नविवेकेनान्यधर्मानारोप्यबिभेतीत्या
ह रज्जुसर्पवदिति रज्जुसर्पमिवात्मानंजीवोज्ञात्वाभयंवहेत्
नाहंजीवः परात्मेतिज्ञातश्चेन्निर्भयोभवेत् २६ यथाअंधका
रादेविकाररहितरज्ज्वादौसर्पाद्यारोपणंकृत्वाभयंकंपादिकंवहे
त् एवमात्मापिस्वस्मिन्जीवत्वमारोप्यसद्विनीयंपरिछिन्नंज्ञा
त्वाभयदुःखसागरेनिमग्नोभवति यदात्वाश्चार्यप्रसादेनज्ञा
स्त्रार्थज्ञानमुत्पन्नंभवति तदाविवेकचक्षुषास्वात्मानमखंडानंद

आ॰टी॰ ज्ञानैकरूपं संपश्यन् ततो नाहं जीवः परमात्माहमिति ज्ञात्वा निर्भ नि१
८ यः सुखदुःखादिरहितः सुखी भवेत् २६ नन्वात्माऽत्यंतसा
8 मीप्येऽपि बुद्धिमनोहंकारादिभिः कथं नावलोक्यते न ज्ञायते तत्रा
ह आत्मेति आत्मावभासयत्येको बुद्ध्यादीनींद्रियाणि च दी
पो घटादिवत्स आत्मा जडैस्तैर्नावभास्यते २७ आत्मा केवल एक
एव सन्नपि बुद्धिमनोहंकारादीनवभासयति तैर्जडैर्मनःप्रभृत्यहंकारा
दिभिः नावभास्यते यथा एक एव दीपो घटादीन् सर्वानपि प्रकाश
यति प्रकाशनैर्घटादिभिः नावभास्यते तद्वदित्यर्थः २७ न
नु आत्मा बुद्ध्यहंकारादिभिः नावभास्यते तर्हि आत्मज्ञानं ज्ञाना
न्तरेण भवतन्व्यमित्याशंक्याह तत्राह स्वबोधेति स्वबोधे नान्य
बोधेच्छा बोधरूपतयात्मनः न दीपस्यान्यदीपेच्छा यथा स्वात्म
प्रकाशने २८ आत्मनो बोधरूपत्वात् स्वबोधे नित्ये सति तस्या राम
त्मनो बोधाय ज्ञानांतरापेक्षा नास्त्येव अनुभवस्वरूपत्वा ८

त्यथादीपस्यैवस्वप्रकाशेनदीपांतरापेक्षानास्तितद्वदित्यर्थः
२८ ननुयदिबुध्यादिभिरात्मज्ञेयोनभवेत्तर्हिआत्मज्ञाने।
उपायांतरंवक्तव्यंसउपायःकः इत्यतआह निषेध्येति निषे
ध्येनिखिलोपाधिंनेतिनेतीतिवाक्यतः विंद्यादैक्यंमहावाक्यै
जीवात्मपरमात्मनोः २९ अथातआदेशोनेतिनेतीतिनिर
स्मिनवेदवाक्येनिखिलोपाधिंनिषिध्यआत्मानंज्ञात्वातत्वम
सिअयमात्माब्रह्मतदहमित्यादिवाक्यैर्लक्षणयाब्रह्मात्मैक्यज्ञा
नंविंद्यात्प्राप्नुयात्अनेनप्रकारेणज्ञातव्यमित्यर्थः २९ आ
त्मस्वरूपज्ञानेअतन्निरसनाभावेकानःक्षतिरित्याशंक्य अ
तन्निरसनाभावेआत्मज्ञातुमशक्यःयथानायंसर्पइतिआरोपि
तस्यापाकरणाभावेरज्जुज्ञानंनोत्पद्यतेतद्वदनात्मनिरसनात्मा
ज्ञातव्यमित्याशयेनाह अविद्येति अविद्यकंशरीरादिदृश्यंबु
द्बुदवत्क्षरं एतद्विलक्षणंविंद्यादहंब्रह्मेतिनिर्मलं ३० अविद्या

आ॰टी॰ कल्पितंदेहेंद्रियादिसर्वंदृश्यजातंअविद्यकंदृश्यत्वात्बुद्बुदव
९ त्क्षरंविनश्वरंएतद्विलक्षणंनिरुपाधिकंनित्यमेकंसच्चिदा
9 नंदात्मकंब्रह्मैवाहमस्मीतिविद्यात्ततःकृतकृत्योभवतीत्य
र्थः ३० एवमुक्तरीत्यात्मानमद्वयानंदंवाक्यार्थज्ञानेनापरो
क्षतयाज्ञात्वास्यानुभवावष्टंभेनस्वात्मन्येवात्मज्ञानमनन
प्रकारमाह पंचभिःश्लोकैः देहेतिदेहान्यत्वान्नमेजन्मजरा
काश्यलयादयः शब्दादिविषयैःसंगोनिरिंद्रियतयानच।
३१ देहान्यत्वाज्जडदृश्यत्वादिस्वभावस्थूलशरीरादन्यत्वात्
मेजन्मजराकार्श्यलयादयोनसंतिइंद्रियादिभिरसंगत्वान्मेश
ब्दादिविषयैर्भोगैःसंगोनुभवोनास्त्येव अमनस्त्वादिति अ
मनस्त्वान्नमेदुःखंरागद्वेषभयादयः अप्राणोह्यमनाःशुभ्रो
इतिचश्रुतिशासनात् अमनइतिस्पष्टार्थः ३२ कथंइंद्रियप्रा राम
णमनसांभासकत्वंइत्याशंक्यश्रुतिंप्रमाणयति अप्राणोह्यम ९
एतस्माज्जायतेप्राणोमनोसर्वेंद्रियाणिच खंवायुर्ज्योतिरापःपृथ्वीविश्वस्यधारिणी ३३॥

नाःशुभ्रोह्यक्षरात्परतःपरः एतस्माज्जायते प्राणो मनःस
र्वेंद्रियाणि च स्पष्टार्थः ३३ गुरुप्रसादात्स्वानुभवसिद्धमर्थं
चाभिनयति निर्गुण इत्यादि स्त्रिभिःश्लोकैर्निर्गुणेति निर्गुणो
निःक्रियो नित्यो निर्विकल्पो निरंजनः निर्विकारो निराकारो
नित्यमुक्तोऽस्मि निर्मलः ३४ अहं निर्गुणः बुद्ध्याद्यभावात् निः
क्रियः इंद्रियाद्यभावात् नित्यः अपक्षयाभावात् निर्विकल्पः सं
कल्पविकल्पाभावात् निरंजनः असंगत्वात् निर्विकारः षोडशा
कलात्मकलिंगदेहमन्यत्वात् निराकारो निरवयवत्वात् नित्य
मुक्तः बंधनाभावात् निर्मलो अविद्यातत्कार्यरहितत्वात् ३४
ननु पूर्वोक्तैर्हेतुभिरेवं विशिष्टस्वरूपमज्ञासिषं इत्युक्ते तर्हि किं वि
शिष्टमित्याशंक्याह अहमिति अहमाकाशवत्सर्वं बहिरंतर्ग
तोऽच्युतः सदा सर्वसमः शुद्धो निःसंगो निर्मलोऽचलः ३५ अ
हं आकाशवत्सर्वं हृदयजातस्य बहिरंतर्गतः अच्युतः च्युतरहितः

आ॰टी॰ सदासर्वसमः विषयेष्वपि समः व्याप्य स्थितः तथा विशुद्धः निर्म
१० लः अचलः पूर्णस्य चलनाभावात् ३५ नित्यमिति नित्यमुक्त
1/10 स्वविमुक्तैकमखंडानंदमद्वयं सत्यं ज्ञानमनंतं यत्परं ब्रह्माह
मेव तत् ३६ एकमखंडं द्वितीयाभावादद्वयं सत्यं ज्ञानम।
नंतं यत्परं ब्रह्मेति श्रुत्या प्रतिपाद्यते तत्परं ब्रह्मैवाहमस्मीति
तत्वस्वरूपं कथितं पूर्वश्लोकोक्तमननं चिरकालाभ्यस्तं सत्स्व
रूपार्थं साधयतीत्याह ३६ एवमिति एवं निरंतरं कृत्वा ब्र।
ह्मैवाहमस्मीति वासना हरत्यविद्याविक्षेपान् रोगानिव रसाय
नं ३७ एवमुक्तप्रकारेण ब्रह्मैवाहमस्मीति निरंतरत्वेन चिरकाला
भ्यस्त वासना अविद्याकृतचित्तविक्षेपान् निःशेषतो नाशयति यथा
रसायनमौषधं चिरकालसेवितं सत् रोगान्निःशेषतो नाशयति
तद्वदित्यर्थः ३७ ब्रह्मानुसाधने साधननियममाह विविक्तेति वि राम
विक्तदेशे आसीनो विरागो विजितेंद्रियः भावयेदेकमात्मानमनंतमन १०

तंमनन्यधीः ३८ विविक्तदेशेजनसंबंधवर्जितेदेशेआसीनोसुख
मुपविष्टःविरागःसर्वत्रगताभिलाषःअतएवनिर्जितानीद्रियाणि
येनसःअनंतमपरिच्छिन्नमद्वयमेकमात्मानमनन्यधीःब्रह्मणोव
स्थितानिश्चयात्मिकाबुद्धिर्यस्यतादृशोभावयेत्ध्यायेत् ३८ न
नुदृश्यप्रपंचेजाग्रतिकथमेकत्वभावसंभवइत्याह आत्मन्येति
आत्मन्येवाखिलंदृश्यंप्रविलाप्यधियासुधीः भावयेदेकमात्मानं
निर्मलाकाशवत्सदा ३९ अखिलंदृश्यजातं सुधीश्शुद्धांतःकर
णःसन्शुद्धतयाधियाआत्मन्येवसमाधिसमयेप्रविलाप्यप्रकर्षे
णनाशयित्वातदाद्वितीयाभावेदेकमात्मानंज्योत्स्नाकाशवत्भाव
यन्नवतिष्ठति ३९ परमार्थदर्शीमुनिर्नामरूपवर्णादिकंसर्वंवि
हायपरिपूर्णज्ञानानंदस्वरूपेणावतिष्ठतिइत्याह नामरूपेति
नामरूपादिकंसर्वंविहायपरमार्थवित् परिपूर्णचिदानंदस्वरूपे
णावतिष्ठति ४० अस्यश्लोकस्यस्पष्टार्थः ननुप्रमानादित्रिपुटी

आ॰टी॰ ज्ञानं वर्त्तमानमुपलभ्यते कथमेकत्वभावेनेत्याशंक्य परमात्मनि
११ भेदो नास्तीत्याह ज्ञातृज्ञानेति ज्ञातृज्ञानज्ञेयभेदः परात्मनि न वि
द्यते परानंदैकरूपत्वात् दीप्यते स्वयमेव तत् ४१ ज्ञातृज्ञानज्ञे
यभेदः परमार्थेनो परमात्मनि न विद्यते स भेदः कल्पितात्मन्येव
भाति ज्ञानानंदैकरूपत्वात् आत्मा स्वयमेव दीप्यति प्रकाशते ए
वं विस्तुस्वयस्तु ध्यातुः प्रत्यक्षफलमाह ४१ एवमिति एवमात्म
रण्यौ ध्यानमथने सततं कृते उदितावगतिर्ज्वाला सर्वाज्ञानेंधनं
दहेत् ४२ आत्मारणिः आत्मा अंतःकरणमेवारणिः तस्मिन्न्र
णावमेवोत्तरारणि ध्यानेन तयोर्मथने सर्वदा कृते तत्रोदिता ज्वाला
रूपावगति ज्ञानं विद्या ज्ञानमेवेंधनं मूलाज्ञानं निःशेषतो सपरि
वारं नाशयति तदा मुमुक्षुः स्वराज्येभिषिक्तः कृतकृत्यो भवतीत्य
र्थः ४२ एवं जीवपरमात्मनोरैक्यं तैवज्ञानेनाविद्यापरिकल्पि राम
तां घतमसि निःशेषमपयाते सति परमात्मा स्वयमेवाविर्भवेत् इत्या ११

ह अरुणेति अरुणेनैवबोधेनपूर्वं संतमसीत्हते ततः आवि
र्भवेदात्मास्वयमेवांशुमानिव ४३ अरुणइत्यरुणप्रकाशेन
आदावंधकारक्षयेंशुमानयथाविर्भवेत् तद्वदात्मापीत्यर्थः॥
४३ आत्मासदापरोक्षस्वभावत्वात् अप्राप्तएवसआत्माकदा
प्राप्तोभवतीतिशिष्याभिप्रायमाह आत्मात्विति आत्मानुसततं
प्राप्तोप्यप्राप्तवदविद्यया तन्नाशेप्राप्तवद्भातिस्वकंठाभरणंय
था ४४ आत्मासर्वत्रपूर्णानंदाद्वयरूपः सर्वदाप्राप्तएवअवि
द्यावशात् भ्रांत्याप्राप्तइवभातितन्नाशेतदावरणविद्यानाशे
वाक्यश्रवणात्प्राप्तइवाभातिकंठगतचामीकरन्यायादित्यर्थः॥
४४ ननुजीवस्यपरमात्मन्येकत्वमयुक्तमित्याशंक्याह स्थाणा
विति स्थाणौपुरुषवत्भ्रांतिकृताब्रह्मणिजीवता जीवस्यता
त्विकेरूपेतस्मिन्दृष्टेनिवर्त्तते ४५ यथाअंधकारेस्थितेस्थाणौ
पुरुषोयमितिचौरशंकयाविभेतितथैवाविचाराब्रह्मणिजीवत्व

आ॰टी॰ मारोप्यते तथा शास्त्रोपदेशजनितविवेकदृष्ट्या तस्य जीवस्य
१२ तात्त्विके रूपे लक्ष्ये तत्त्वंपदार्थैक्ये दृष्टे अज्ञानकल्पितत्वात् जीव
त्वमपि निवर्त्तते ब्रह्मैवाहमिति जानातीत्यर्थः ६५ ननु अहं
ममेति अज्ञानप्रत्यये जागरति कथं नाहमिति प्रत्ययः स्यादित्याशंक्य
तदपि तथैव अमृषा इत्याह नत्वेति तत्त्वस्वरूपानुभवादुत्पन्नं
ज्ञानमंजसा अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ६६
जीवपरमात्मनोरैकत्वादुत्पन्नं परं ज्ञानं तदहंममेत्यज्ञानं बा।
धते दिग्भ्रमादिवत् इति भानुदर्शनादित्यर्थः ६६ अहंममेति
प्रत्ययेन नष्टे योगी विज्ञानचक्षुषा सर्वं हृत्त्वं प्रपंचं स्वात्मन्येवानु
भवेन पश्यतीत्याह सम्यगिति सम्यग्विज्ञानवान्योगी स्वात्म
न्येवाखिलं स्थितं एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा॥
६७ एकमात्मानं सर्वं यदा पश्यति कृतकृत्यो भवतीति भावः। राम
६७ नन्वात्मानं सर्वं पश्यतीति प्रत्यक्षविरोधात् नानात्वेन दृश्य १२

मानमिदं सकथमात्मन्यभेदेनपश्यतीत्याह आत्मैवेति आत्मै
वेदं जगत्सर्वमात्मनोऽन्यंनकिंचन मृदोयद्वत् घटादीनिस्वात्मा
नं सर्वमीक्षते ७८ इदं सर्वं जगदात्मैव आत्मकार्यत्वात् अर्थ
तोन्यदात्मनोनाकिंचिद्विद्यते यथाघटशरावादिकं मृत्कार्यम्मृदेनि
न्नोस्ति अतः स्वात्मन्येवसर्वं द्रव्यजातमभेदेननिरीक्षतेपश्यती
तिवाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमितिश्रुतेः।
७८ एवंभूतायस्यैवजीवन्मुक्तिरित्याह जीवन्मुक्तिरिति जी
वन्मुक्तिस्तुतद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत् सच्चिदानंदरूपत्वा
भवेद्भ्रमरकीटवत् ७९ अनाद्यविद्ययापरिकल्पितपूर्वोपा
धिदेहमनोबुद्ध्यादीन् गुणान् सत्वादीन् परित्यजेत् इतिद्वयमेव
जीवन्मुक्तिरुच्यते सच्चिदानंदत्वात् भ्रमरकीटवत् साक्षाद्ब्रह्म
भवेत्प्राप्नोतीत्यर्थः ७९ ततस्तु आत्मारामः सुखंतिष्ठतीत्या
ह तीर्त्वेति तीर्त्वामोहार्णवंहत्वारागद्वेषादिराक्षसान् योगीशा

आ०टी० १३. 13 तिसमायुक्तः आत्मारामोविराज्यते ५० मोहएवार्णवः अपर्यंतत्वा
त्तंज्ञानलवेनतीर्त्वानिःशेषंनाशयित्वारागद्वेषादयोएवराक्षसा
मोक्षपरिपंथिनस्तान्निःशेषतोनाशयित्वाशांतिसमायुक्तःशम
दमादिसहितःआत्मारामःआत्मन्येवक्रिडायस्यसविराजतेतेना
स्वराजेभिषिक्तःप्रकाशतेअत्राअर्थांतरंध्वन्यतेअथात्मारामः
श्रीरामःसमुद्रंतीर्त्वारावणादीन्राक्षसान्हत्वासीतेवशांतिस्त
यासीमयासमेतःविराज्यतेअयोध्यायां ५० जीवन्मुक्तस्यलक्ष
णमाह बाह्येति बाह्यानित्यसुखासक्तिंहित्वात्मसुखनिर्वृतः॥
घटस्थदीपवत्स्वस्थःअंतरेवप्रकाशते ५१ बाह्येंद्रियविष
योद्भवानित्यसुखासक्तिंप्रतिवासनांहित्वातत्वहेतुःआत्मसुख
निर्वृतःघटस्थदीपवदंतरेवप्रकाशतेस्वसाक्षिकमेवात्मानु
भवसुखमितरैर्नज्ञायतेइत्यर्थः ५१ एवमुक्तप्रकारेण। राम
जीवन्मुक्तःसन्प्रारब्धसंक्षयादेवनिवर्तितन्यमित्याह उपा १३

धिस्थइति उपाधिस्थौंपितद्भैर्नैर्लिप्तोव्योमवन्मुनिः सर्वस्मन्ब
वन्तिष्टेदसक्तोवायुवच्चरेत् ५२ देहोपाधौसाक्षित्वेनस्थितोपि
मुनिःव्योमवत्तद्भैर्नानुलिप्तः ममकर्मलेपोनास्तीतिभावयन्
सर्वज्ञोपिमूकवत् प्राकृतवत्तिष्टेत् सर्वत्रविषयेषुयदृच्छयाप्राप्तेषु
नाशक्तोआशक्तिरहितःसन्वायुवत् चरेत् निवर्त्तयेत् ५२ प्रार
ब्धक्षयेदेहोपाधौलीनेविदेहकैवल्यमाह उपाधीति उपाधिवि
लयाद्विष्णौनिर्विशेषंविशेन्मुनिः जलेजलंवियद्व्योम्नितेजस्तेज
सिवायथा ५३ उपाधिभूतदेहद्वयाविलयेप्रारब्धकर्मसंक्षये मु
निःयोगीविष्णौसर्वत्रव्यापकेपरेब्रह्मणिनिर्विशेषंयथाभवतितथ
थाविशेत् अत्यंतप्रवेशेदृष्टांताःजलेजलमित्यादि ५३ ब्रह्मणःस
र्वोत्तिशायित्वात् तत्स्वलक्षणेनाभिधत्तेश्लोकद्वयेन यल्लाभान्नो
परोलाभोयत्सुखान्नोपरंसुखं यज्ज्ञानान्नोपरंज्ञानंतद्ब्रह्मेत्यवधा
रयेत् ५४ यद्ब्रह्मसाक्षात्कारलाभादपरोलाभोनविद्यतेसर्वलाभा

आ॰टी॰ नांतत्रैवांतरभूतत्वात् यथाब्रह्मानंदस्तद्धानंदानामंतर्भावःयत्सु
१७ खाद्भूत्वानुभवसुखादपरंसुखंनास्तिनिरतिशयत्वात् यज्ज्ञानात्
14 यद्ब्रह्मसाक्षात्कारज्ञानादपरंज्ञानंनास्तिमोक्षहेतुत्वात्तद्ब्रह्मेतिजा
नीयात् यद्दृष्ट्वेति यद्दृष्ट्वानापरंदृश्यंयत्भूत्वानपुनर्भवः यज्ज्ञा
त्वानापरंज्ञेयंतद्ब्रह्मेत्यवधारयेत् ५५ यद्दृष्ट्वानापरमन्यत्दृ
श्यंनास्त्येवनैवपुरुषार्थसमर्थत्वात् यद्भूत्वायद्रूपतांगत्वातेनैवंग
त्वापुनर्भवोजन्मादिकंनास्तियज्ज्ञात्वायत्स्वरूपंज्ञात्वान्यत्ज्ञेयं
नास्तितदेवब्रह्मेत्यवधारयेत् अन्यत्सर्वंवृथापांडित्यमित्यर्थः
५५ तिर्यगूर्ध्वमधःसर्वंब्रह्मैवपूर्णमित्याह तिर्यगिति ति
र्यगूर्ध्वमधःपूर्णंसच्चिदानंदमद्वयं अनंतंनित्यमेकंयत्तद्ब्रह्मे
त्यवधारयेत् ५६ तीर्थगेतिस्पष्टार्थः ५६ अखंडआनंदमेकं
ब्रह्मवेदांतैरतद्व्यावृत्तिरूपेणअतन्निरसनेनज्ञानमित्याह राम
अतदिति अतद्व्यावृत्तिरूपेणवेदांतैर्लक्ष्यतेद्वयं अखंडआनंदमेकं १७

यत्तद्ब्रह्मैत्यैवं धारयेत् ५७ स्पष्टार्थः ५७ ननु ब्रह्मादयोपिनि
रतिशयानंदिन एव भूयंते तत्राह अखंडानंदरूपस्य तस्यानंद
लवाश्रिताः ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनो लवाः ५८
ब्रह्मादयः परिछिन्नानंदिन एव ब्रह्म तु अखंडानंदानुभवानंद
रूपत्वात् अपरिछिन्नानंदमेव स्वरूपं यस्य तस्यानंदसमुद्रस्या
नंदलवा लेशमात्रमाश्रित्य ब्रह्मेंद्रादयोपि आनंदिनो भवंति आनंदसा
रतम्येन एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रु
तेः ५८ ननु परमप्रेमास्पदतया आत्मैव भातीत्युच्यते तदयु
क्तं अनात्मापि देहादि प्रपंचप्रियतरमनुभूयते इत्याशंक्याह त
द्युक्तमिति तद्युक्तमखिलं वस्तु व्यवहारास्तदन्विताः तस्मात्स
र्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ५९ अखिलं देहाद्यनात्मवस्त्व
पि तद्युक्तं तेनात्मनासंयुक्तमेव प्रियतमं लौकिकोपि व्यवहारस्त
द्युक्तमेव प्रियतरं तस्मात्सर्वगतं ब्रह्मात्यंतप्रियं यथा सर्वक्षीरं व्या

आ०टी० प्यष्टतमेवावतिष्ठते तस्मात्सर्वस्वपि ब्रह्मव्याप्तत्वात् प्रियतममेवा
१५ भातीत्यत आत्मैव प्रियतमः इति प्रसिद्धं ५९ ननु तर्हि आत्मा के
15 न प्रकारेण सर्वं व्याप्य तिष्ठतीति जानीयात् इत्याशंक्याह साक्षाद्
कुमशक्यत्वात् अनएवस्थूलमिति श्रुतेः स्वस्वरूपेण भातीत्या
ह अनएवंऽस्थूलंऽमह्रस्वंऽमदीर्घंऽमजंऽमव्ययं अरूपगुणवर्णाख्यं
तद्ब्रह्मेत्यवधारयेत् ६० अनएवस्थूलमिति स्पष्टार्थः ६० पुन
स्तद्ब्रह्मज्ञानार्थं श्लोकत्रयेण पृथक् पृथक् निरूपयति यद्भेति॥
यद्भासा भास्यतेऽर्कादि भास्यैर्यत्तु न भास्यते येन सर्वमिदं भाति
तद्ब्रह्मेत्यवधारयेत् ६१ यद्वस्तु भासा आदित्यं भासयति न तु भा
स्यैरर्कादिभिर्भास्यते न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्यु
तो भाति कुतोऽयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमि
दं विभाति इति श्रुतेः येन सर्वमिदं भूतभौतिकं भावरूपं जगद्भाति राम
तद्ब्रह्मेत्यवधारयेज्जानीयात् तप्तायसपिंडवत् स्वयमेवांतर्बहिर्व्या १५

प्यभासन्नखिलंब्रह्मप्रकाशात इत्याह स्वयमिति स्वयमंतर्गतंया
प्यभासयन्नखिलंजगत् ब्रह्मप्रकाशतेवहिःप्रतप्तायसपिंडवत्॥
६२ स्वयमितिस्पष्टार्थः ६२ पुनस्तदेवाहयंजगद्विलक्षणमितिस
र्वंब्रह्मैवसत्यंतथापिजगद्रूपेणयदापश्यतितदागत्यतेइत्याह ज
गद्विलक्षणंब्रह्मब्रह्मणोन्यन्नकिंचन ब्रह्मान्यद्भातिचेन्मिथ्याय
थामरुमरीचिका ६३ जगदितिजगद्विलक्षणंयेनतत्कार्यत्वेनवि
चार्यतत्वज्ञातुंशक्यंब्रह्मणोन्यन्नविद्यतेयदिततोन्यत् दृश्यतेयत्
किंचित्तत्कर्षैवमरुमरीचिकाजलवदित्यर्थः ६३ पुनस्तदेवस्प
ष्टंनिरूपयति दृश्यतइति दृश्यतेश्रूयतेयद्यद्ब्रह्मणोन्यन्नकिं
चन तत्वज्ञानाद्यतद्ब्रह्मसच्चिदानंदमद्वयं ६४ चक्षुश्रोत्रेणदृ
श्यतेश्रूयतेयन्मनसास्मर्यतेयच्चवाचाभिधीयतेतत्वज्ञानात्सर्वं
ब्रह्मैवसच्चिदानंदाद्वयंब्रह्मणोन्यन्नकिंचिदस्तीत्यर्थः ६४ न
नुयदिसर्वगतंब्रह्मतत्सर्वैःकिन्नपश्यत इत्याशंक्य चक्षुरादिभि

आ॰टी॰ नगृह्यते इत्यनयाश्रुत्याप्रतिपादयति नचक्षुषागृह्यते नापिवा
१६ चानान्यैर्देवैस्तपसाकर्मणा वाज्ञानप्रसादेनविशुद्धसत्वस्ततस्तु
16 पश्यतिनिष्कलंध्यायमानंइतिश्रुतेः सर्वगंसच्चिदात्मानंज्ञा
नचक्षुर्निरीक्षते अज्ञानचक्षुर्नेक्षेतभास्वंतंभानुमंधवत् ॥
६५ यः एतज्ञानचक्षुः सर्वगतमपिसच्चिदानंदंब्रह्मपश्यतिय
स्त्वज्ञानचक्षुः सनपश्यतियथाप्रकाशमानमपिभानुंअंधोन
पश्यतिज्ञानप्रसादेनचक्षुषाविशुद्धसत्वः निवृत्ताविद्योसदास
र्वत्रब्रह्मैवपश्यतिनचक्षुषापश्यतिकश्चिदेनंहृदामनीषाम
नसाभिक्लृप्तोयएनंविदुरमृतास्तेभवंतीतिश्रुत्यापितस्यप्रमा
णांतराविषयत्वमवधार्यतेइत्यर्थः ६५ एवमुक्तरीत्यानुभ
वसंपन्नस्यापितदाभासरहितस्यवासनावशात् किंचिदज्ञानंस
भवतितत्परिहारार्थंपुनःस्मरणादिकुर्यादित्याह स्मरणादिति राम
स्मरणादिभिरुद्दीप्तोज्ञानाग्निपरितापितः जीवः सर्वमलान्मुक्तः १६

स्वर्णवत्द्योतते स्वयं ६६ जीवः प्रत्यगात्मा एतस्मैकरणार्थं स्म
रणादिभिर्मननादिभिरुद्दीप्तः प्रकाशितः ज्ञानमेवाग्निस्तेन
परितापितो भाति शोभत इत्यर्थः सर्वसंसारमूलभूताज्ञानमला
न्मुक्तः स्वयमेव सम्यक् प्रकाशते यथाग्निपरितापितः स्वर्णे
औपाधिकं दुर्वर्णादिकं हित्वा स्वरूपेण प्रकाशते तद्वदित्यर्थः॥
६६ एवं शोधितो जीवः परमात्मा हृदाकाशे उदितः सन् तमः अ
ज्ञानमुपसंहृत्य भानुवत् सर्वस्वरूपः प्रकाशत इत्याह हृदीति हृ
दाकाशोदितो ह्यात्मा बोधभानुस्तमोपहृत् सर्वव्यापी सर्वधारी
भाति सर्वं प्रकाशते ६७ बोध एव भानुः सर्वस्याधारभूतत्वात्
सर्वव्यापी सर्वधारी च शेषं स्पष्टं ६७ न त्वात्मनो ज्ञानप्रतिबंध
कदुरितपरिहारार्थं प्रयागादितीर्थयात्राघोषणः कर्त्तव्यमित्याशं
का आत्मतीर्थस्नातस्य न किंचित्कर्त्तव्यमित्याह दिग्देशेति दिग्
देशकालाद्यनपेक्ष्य सर्वगं शीतादिहृन्नित्यसुखं निरंजनं यः स्वा

आ·टी· त्मतीर्थंभजतेविनिष्क्रियःससर्ववित्सर्वगतोऽमृतोभवेत् ६८

१७ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदपादपू

17 ज्यशिष्यश्रीमच्छंकराचार्यविरचितंआत्मबोधस्यप्रकरणं

समाप्तम् योविनिःक्रियःपरमहंसःस्वात्मतीर्थंभजतेससर्व

वित्सर्वज्ञःसर्वत्रपरमात्मस्वरूपत्वात् अमृतःमुक्तोभवेत्कथं

भूतंस्वात्मतीर्थंदिग्देशकालाद्यनपेक्ष्यमेवसर्वगंशीतादिद्वंद्व

दुःखानिहरतीतिशीतादित्तन्नित्यसुखंमोक्षानंदस्वरूपत्वात्

इतरतीर्थेषुतद्विपरीतंद्रष्टव्यंतस्मादात्मतीर्थेस्नानस्यनकिंचि

दवशिष्यतइतिभावः ६८ इतिश्रीमहात्मबोधप्रकरणंटीका

संपूर्णम् श्रीकृष्णार्पणमस्तु शुभंभवतु श्रीरस्तु राम ॥

यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया यदिशुद्धमशुद्धंवाम

मदोषोनदीयते १ लिखितंउमापतिसमीपेजयाहिरगिर ॥ राम

१७